# श्रीमहाबुद्धिदेव्यष्टक स्तोत्रम् (ज्ञानप्रदं)

सुधाशुभ्रगात्रां रमावैघ्नयुक्तां । द्वयज्ञानरुपां जगन्मूलभूतां ।।
चतु:षष्टिकोट्याख्य विद्यासमेतां । परब्रह्मरूपां भजे ज्ञानदात्रीं ।।१।।

महावाक्यविघ्नेशशीर्षस्वरुपां । परब्रह्ममूलां विवेकादि जुष्टां ।
प्लुतौंकाररुपां परज्ञानरुपां । परब्रह्मरूपां भजे ज्ञानदात्रीं ।।२।।

महाबोधरुपां परां शुद्धमायां । सुषुम्णा मुखस्थां चिदानंदरुपां ।।
तमोनाशिनी चिन्मयीं नादरुपां । परब्रह्मरुपां भजे ज्ञानदात्रीं ।।३।।

विवेकादि भृत्यां स्वभक्तादि जुष्टां । गजास्येन युक्तां विधिस्थानसंस्थां ।।
रजोदोषहन्त्रीं च रागादि हन्त्रीं । परब्रह्मरुपां भजे ज्ञानदात्रीं ।।४।।

जलस्थानसंस्थां तम: कृत्यहन्त्रीं । हृदब्जे वसंतीं सुतत्व प्रदात्रीं ।
वराष्टांगयोगोत्थलाभप्रदात्रीं । परब्रह्मरुपां भजे ज्ञानदात्रीं ।।५।।

विशुद्धिस्थलस्थां मनोग्रंथिहंत्रीं । सदा ध्यानयोगप्रदात्रीं सदाढ्यां ।
विवेकादि संदायकां सत्यरूपां । परब्रह्मरुपां भजे ज्ञानदात्रीं ।।६।।

परब्रह्मयुक्तां तु भ्रूमध्यसंस्थां । सहस्त्रारपद्मस्थितां ब्रह्मरंध्रे ।
महास्थूलविद्यानिहंत्रीं स्वशक्त्यां । परब्रह्मरुपां भजे ज्ञानदात्रीं ।।७।।

परब्रह्मदात्रीं सुधावर्षिणीं तां । परब्रह्मसायुज्यदात्रीं तु बुद्धिं ।
सुधास्थानगां मूलवन्हिस्वरुपां । परब्रह्मरुपां भजे ज्ञानदात्रीं ।।८।।

इदं येऽष्टकं ज्ञानदाख्यं पठंते । त्रिसंध्यं महाबुद्धिभक्तावतंसा: ।
चतु:षष्टिकोट्याख्य विद्यां लभंते । ध्रुवं ते निजांते निजं धाम बुद्ध्या:।।९।।

ॐ तत्सदितिब्राह्मे महापुराणे श्रीमन्महाबुद्ध्यष्टकं संपूर्णम् ।